# Kalyanikamalavratanirupanam

# કલ્યાણીકમલાવ્રતનિરૂપણમ્

## Document Information

Text title : Kalyanikamalavratanirupanam

File name : kalyANIkamalAvratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 138/76-104||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# કલ્યાણીકમલાવ્રતનિરૂપણમ્

અથાઽન્યત્તે શુભં લક્ષ્મિ કલ્યાણીકમલાવ્રતમ્ ।
અશેષયજ્ઞફલદમશેષાઘવિનાશનમ્ ॥ ૭૬॥

અશેષદુષ્ટશમનમશેષસુરપૂજિતમ્ ।
પવિત્રાણાં પવિત્રં ચ મઙ્ગલાનાં સુમઙ્ગલમ્ ॥ ૭૭॥

દૈવતં દૈવતાનાં ચ પુરાણાનાં પુરાતનમ્ ।
માઘશુક્લૈકાદશિકાવ્રતં કલ્યાણદં શુભમ્ ॥ ૭૮॥

ઘૃતેનાઽભ્યઞ્જનં કૃત્વા દશમ્યાં ચ તિલૈર્જલૈઃ ।
સ્નાત્વા પ્રાતર્હરિકૃષ્ણં પૂજયેત્ સર્વવસ્તુભિઃ ॥ ૭૯॥

નમોઽનાદિકૃષ્ણનારાયણાય પાદયોર્નમઃ ।
સર્વાત્મને નમઃ કે ચ વૈકુણ્ઠાય નમો મુખે ॥ ૮૦॥

શ્રીવત્સધારિણે વક્ષઃસ્થલે નમો મુહુર્મુહુઃ ।
શઙ્ખચક્રગદાપદ્મવરદાનપ્રધારિણે ॥ ૮૧॥

નમો બાહુષુ સર્વેષૂદરે દામોદરાય ચ ।
મેઢ્રે નમઃ સુખદાય ઊર્વોઃ સૌભાગ્યદાય ચ ॥ ૮૨॥

જાન્વોર્નમો ભૂતધ્રાય જઙ્ઘયોર્મોક્ષદાય ચ ।
પાદયોઃ પાપનાશાય શ્રીકૃષ્ણાય નમો નમઃ ॥ ૮૩॥

નમઃ કલ્યાણકારિણ્યૈ કમલાયૈ નમો નમઃ ।
નમઃ શ્રીલલિતાલક્ષ્મ્યૈ જયાલક્ષ્મ્યૈ નમો નમઃ ॥ ૮૪॥

નમઃ શ્રીમાણિકીલક્ષ્મ્યૈ નારાયણીશ્રિયૈ નમઃ ।
નમઃ શ્રીસુખદાલક્ષ્મ્યૈ શિવરાજ્ઞીશ્રિયૈ નમઃ ॥ ૮૫॥

નમઃ શ્રીપાર્વતીલક્ષ્મ્યૈ કાન્તાપ્રમાશ્રિયૈ નમઃ ।
નમઃ શ્રીકમ્ભરાલક્ષ્મ્યૈ મહાલક્ષ્મીશ્રિયૈ નમઃ ॥ ૮૬॥

નમઃ શ્રીસન્તુષ્ટિલક્ષ્મ્યૈ કાર્ષ્ણીશ્રિયૈ નમો નમઃ ।
નમઃ શ્રીરાધિકાલક્ષ્મ્યૈ રમાલક્ષ્મ્યૈ નમો નમઃ ॥ ૮૭॥

એવં નત્વા ચ ગોવિન્દં શ્રિયં નત્વા પુનઃ પુનઃ ।
સર્વોપચારકૈશ્ચોભૌ કલ્યાણદૌ પ્રપૂજયેત્ ॥ ૮૮॥

ગન્ધૈર્માલ્યૈર્ધૂપદીપૈર્ભક્ષ્યૈર્નાનાવિધૈરપિ ।
જલૈસ્તામ્બૂલકૈશ્ચારાર્ત્રિકૈઃ પુષ્પાર્પણૈસ્તથા ॥ ૮૯॥

પ્રીયતાં મમ ગોપાલઃ શ્રીપતિઃ પુરુષોત્તમઃ ।
પ્રીયતાં મમ કલ્યાણીમહાલક્ષ્મીનરાયણી ॥ ૯૦॥

એવમુચ્ચાર્ય શયને સ્થાપયેત્ પરમેશ્વરીમ્ ।
મધ્યાહ્ને પૂજયેચ્ચાપિ ભોજયેચ્ચ નિશામુખે ॥ ૯૧॥

સોત્સવં પૂજયેચ્ચાપિ ભોજયેત્ પાયસાદિકમ્ ।
સુપ્ત્વા ચૈકાદશીપ્રાતરુત્થાય સ્નાનમાચરેત્ ॥ ૯૨॥

પૂજયેદ્વિધિના લક્ષ્મીં કલ્યાણીં મણ્ડપે શુભે ।
સર્વતોભદ્રકે રમ્યે મણ્ડલે વિષ્ણુના સહ ॥ ૯૩॥

પૂજયિત્વા ચ ગોદાને શય્યાદાનં ઘટાર્પણમ્ ।
લક્ષ્મ્યર્પણં રત્નભૂષામ્બરપાત્રધનાર્પણમ્ ॥ ૯૪॥

ધાન્યભોજનભોગ્યાદ્યર્પણં કુર્યાદ્વ્રતી પ્રગે ।
ભોજયેચ્છ્રીમહાલક્ષ્મીં દુગ્ધં ફલાદિકં શુભમ્ ॥ ૯૫॥

મધ્યાહ્ને પૂજયેચ્ચાપિ ભોજયેત્ પાયસાદિકમ્ ।
સાયં સમ્પૂજયેચ્ચાપિ રાત્રૌ જાગરણં ચરેત્ ॥ ૯૬॥

દ્વાદશ્યાં પ્રાતરેવાઽપિ પ્રપૂજ્ય વિધિના દિશેત્ ।
ગુરવે સાધવે સાધ્વ્યૈ દાનાનિ ચ દ્વિજાતયે ॥ ૯૭॥

ભોજયેત્સુમૃષ્ટમિષ્ટાન્નાનિ વિપ્રાન્ સતસ્તથા ।
બાલકાન્ બાલિકા નારીઃ સાધૂન્ સમ્ભોજયેત્તથા ॥ ૯૮॥

દદ્યાદ્દાનાનિ બહૂનિ પરિહારં તતશ્ચરેત્ ।
લક્ષ્મીનારાયણસંહિતાયાઃ કથામિમાં વદેત્ ॥ ૯૯॥

પઠનાચ્છ્રવણાદસ્ય સ્મરણાચ્ચાનુમોદનાત્ ।
ભુક્તિર્મુક્તિર્ભવેચ્ચાપિ કલ્યાણાનિ બહૂનિ ચ ॥ ૧૦૦॥

પુરાજન્મનિ ચાભીરીકન્યા કલ્યાણિનીવ્રતમ્ ।
કૃત્વા નારાયણપુત્રી ઊર્વશી સમજાયત ॥ ૧૦૧॥

પુરા વૈશ્યકુટુમ્બોત્થા પુલોમકન્યકા ત્વિદમ્ ।
વ્રતં કૃત્વા મહેન્દ્રાણી વ્યજાયત દિવેશ્વરી ॥ ૧૦૨॥

પુરા કૃત્વા વ્રતં ચૈતત્ સુરપુત્રો દ્વિજસ્તતઃ ।
સૂર્યો બભૂવ સ્વર્ગેશઃ સહસ્રરશ્મિવાન્ પ્રભુઃ ॥ ૧૦૩॥

તસ્માત્ કલ્યાણિકાલક્ષ્મીવ્રતં સ્વેષ્ટોત્તમપ્રદમ્ ।
માઘે દિનત્રયં કાર્યં સર્વકલ્યાણસમ્પ્રદમ્ ॥ ૧૦૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૮-અધ્યાયાન્તર્ગતં કલ્યાણીકમલાવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૮/૭૬-૧૦૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 138/76-104..

Proofread by PSA Easwaran

*Kalyanikamalavratanirupanam*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*